# Muktamala

# મુક્તામાલા

## Document Information

Text title : Muktamala

File name : muktAmAlA.itx

Category : raama, moropanta, shataka

Location : doc_raama

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2023

*sanskritdocuments.org*

# મુક્તામાલા

(* ગીતિવૃત્તં)

(૧)પુણ્યશ્લોકશિખામણિચરણં શરણં સતામતાપકરં ।
વન્દે નતનરકપિસખમખલજિતં મખભુજાં મહઃ પ્રથમમ્ ॥ ૧॥

વિધાય પઞ્ચદશેન શતેન ગીતિભિઃ સહૃદયેભ્ય ઉપાયનીકરોતિ ।
(૨)નિસ્પૃહનિર્ભયવિત્તં શ્યામલમતિશયિતદાયિતમનિમિત્તમ્ ॥ ૨॥

બહુભિઃ(૩) કૃતં, ચતુર્ભિઃ પઙ્ક્તિરથઃ પુત્રિણામભૂરપથમઃ ।
બહુદાનામપિ, પુત્રૌ ધર્માર્થમસૌ દદૌ યદૌદાર્યાત્ ॥ ૩॥

ગાધિજ(૪)! । ભવતોઽધીતં શિષ્યૈઃ કતિભિર્ન ગાલવપ્રમુખૈઃ
વરમેકો દાશરથિઃ પિવતામુદધેરપોઽબુદો હ્યધિકઃ ॥ ૪॥

માતરહલ્યે(૫) ! । સ્પૃષ્ટા યેન પદા તમપિ પૂજયસિ બાલં ।
નૂનં સ તવ સતીર્થ્યઃ પદાહતોઽપ્યુરસિ યો નનામ ભૃગુમ્ ॥ ૫॥

અબલાકૃષ્ટમપિ(૬) સદસિ ધનુરૈશં હા કથં નુ ભગ્નમિતિ ।
ભીતમિવાનતકન્ધરમાશ્લિષ્ય દદાવિવાભયં ભગવાન્ ॥ ૬॥

સર્વસહાપિ(૭) ધનુષસ્તસ્ય ચકમ્પે રવેણ ઘોરેણ ।
બાલાપિ ભૃશં મુમુદે સીતા મૃદુનેવ વેણુનાદેન ॥ ૭॥

ગુરુણા(૮) યોગં કર્તું સઞ્જીવિન્યેવ સીતયાતુલયા ।
સર્વમતેન વિનાશશ્ચાપેનાઙ્ગીકૃતઃ કયેનેવ ॥ ૮॥

(૯)બહુભુજમરિમજયમિતિ કિમનેન દૈવં તુ હેતુરત્રૈકં ।
ગ્રસતે સહસ્રકરમપિ કાલે રાહુર્હિ બાહુવિકલોઽપિ ॥ ૯॥

ભગવન્વસિષ્ઠ ! । કથમિદમધુનૈવ મુહૂર્તમીદશ દત્તં ।
ક્વ વનપ્રયાણમહહ ક્વ ચ યુવરાજ્યાભિષેકમેહકાલઃ(૧૦) ? ॥ ૧૦॥

(૧૧)પઙ્કેરુહદૃશમધ્વનિ તં કેવલમઙ્ગનાનુજાનુગતમ્ ।

શઙ્કે ધાવિતમીક્ષિતુમઙ્કે વિસ્મૃત્ય શિશુમપિ સ્ત્રીભિઃ ॥ ૧૧॥

(૧૨)નૃત્યન્મયૂરપરિવૃતમેણકુલાનુગતમલિભિરુપસ્પૃષ્ટં ।
તં ઘનદૂર્વાપુઞ્જશ્યામલમબ્જાનનં ભજેઽધ્વન્યમ્ ॥ ૧૨॥

સૌરાવપ્યમૃતકરૌ(૧૩) યૌ રાજવરૈઃ સદા શિરોધાર્યૌ ।
ગૌરાસિતૌ વરમણી પૌરા બત! હારિતૌ પ્રમાદેન ॥ ૧૩॥

(૧૪)માત્રા માઽત્રાઽઽસ્વેતિ પ્રહિતો વનમાલયાન્નિજં ધર્મં ।
પિત્રાપિ ત્રાતું યસ્તં ધર્મજ્ઞોત્તમં જગુઃ કવયઃ ॥ ૧૪॥

કિમિતિ(૧૫) નિષાદ ! । વિષાદઃ પશ્ય કુમારોઽયમર્કકુલપાલઃ ।
વનમાગતોઽપિ વલ્ક્યપિ જટિલોઽપિ નૃપોત્તમશ્રિયા શ્લિષ્ટઃ ॥ ૧૫॥

કુશલી(૧૬) તેઽસ્તિ કુમારો મા રોદીરમ્બ તં બહોઃ કાલાત્ ।
વનં ગતા રામાદય ઋષિભિઃ સત્કૃતા ઇત્યર્થઃ ।
તૃષિતાઃ પિબન્તુ વન્યાઃ સંન્યાસિન ઉત્સુકાઃ સુકાર્યમિતાઃ ॥ ૧૬॥

(૧૭)વર્તે પિતુરુત્સઙ્ગે સઙ્ગે માતુઃ પુરે પુરેવ સુખં ।
ઇતિ ભવદાત્મજમતમત આસ્માનં દેવિ! કાનનેઽમંસ્થાઃ ॥ ૧૭॥

નન્દન(૧૮) વનં વ્રજેતિ ત્વમવોચઃ સત્યમજકુલોત્તંસ ! ।
સ તુ વનમગાત્તમીક્ષિતુમવિચાર્ય ગતોઽસિ નન્દનં હન્ત! ॥ ૧૮॥

અમૃતમપિ નામ પિબતસ્તાપો બહુલીભવત્યદઃ કિમિતિ ।
પ્રષ્ટું નુ દશરથ! ત્વં (૧૯)દેસ્રાવસ્રાકુલક્ષણો યાતઃ ॥ ૧૯॥

(૨૦)સ્ત્રૈણં ત્વામૂચુરહો રહોગતા મન્ત્રિણો ન મુનયોઽપિ ।
સાકમમરપતિના કે નાકેઽપિ ભવન્તમાગતં વીક્ષ્ય ॥ ૨૦॥

(૨૧)શોચ્યાસિ ત્વમયોધ્યે! ॥ અપહૃતમટવ્યા ત્વદીયસૌભાગ્યં ।
પતિમિચ્છન્ત્યા ભાવ્યં ત્વયાપિ માતર્વિપક્ષવેષયુજા ॥ ૨૧॥

(૨૨)મા માતરમવમંસ્થા ભરત ! । સ્વગુણપ્રકાશહેતુમિમાં ।
સેકાદધિકમશોકે કુશલં પાદાહતેર્યદિ વરં સા ॥ ૨૨॥

વિષયવિરક્તિર્ગુરુપદભક્તિરખિલસજ્જનેષુ મહિતત્વમ્ ।
ક્વત્યં સત્યં વદ પદપદ્મં મા જાતુ માતુરવમંસ્થાઃ ॥ ૨૩॥

માતઃ કૈકેયિ! । જગતિ કૃતિષુ કૃતોપકૃતિષુ સ્વમેવ વરમ્ ।
યદખિલલોકહિતં કૃતમુરરીકૃત્યાપિ દુઃસહં વ્યસનમ્ ॥ ૨૪॥

(૨૩)કાસ્યાન્યાસ્યાબ્જાસવમધુપી ત્વત્તો નૃપસ્ય બહુમાન્યા ।
દાસ્યા હાસ્યાસ્પદતાં સરલે! નીતાસિ દેવિ! મન્થરયા ॥ ૨૫॥

ઉદિત(૨૪) નીતિમદમતં મુદિતં સિદ્ધિં સમીક્ષ્ય ભોક્તુમલં ।
ઉદિતં ફલમનયતરો રુદિતં બત મન્થરે ! ત્વયા કિમિતિ? ॥ ૨૬॥

(૨૫)શોકદવજ્વલનાવૃતશુદ્ધાન્તવનૈકસંશ્રયા મૃગ્યઃ? ।
બાષ્પસ્નાતાસ્તિષ્ઠત જીવનદઃ ક્વ નુ સ સામ્પ્રતં મૃગ્યઃ? ॥ ૨૭॥

દીપક ઇવ નિઃશ્વાસૈર્નહિ શોકશિખી(૨૬) પ્રયાતિ નિર્વાણં ।
બત! વર્ધતેઽશ્રુસલિલૈરપિ તૂષ્ણીકૈસ્ત્વયં સુખં જેયઃ ॥ ૨૮॥

ચિન્તે ! । કિં તે વિષયૈર્ધ્યાતૈઃ ક્ષણભઙ્ગુરૈર્વિષાદફલૈઃ ।
દાસ્યતિ લબ્ધ્વા કામં કામં કા મઙ્ગલા મુદં સમ્પત્ ॥ ૨૯॥

મૂર્તઃ સદયઃ સદયઃ સરસઃ (૨૭)સુધૈકપરિપૂર્ણાત્ ।
શમયન્નમતાં મમતાં શમલં શમલં દદાતિ કોઽપિ જટી ॥ ૩૦॥

કાપિ(૨૮) તપસ્વિજનાનાં તપસાં સિદ્ધિર્મહેશગલમાલા
નીલાપીલાધરમુપહસતિ ગુણૈરિન્દુમપિ પયોધિમપિ ॥ ૩૧॥

અવને(૨૯) પટુસ્ત્રિજગતામવનેરાદ્યઃ પ્રિયોઽપિ જામાતા
ભવને વિધાતુરીડ્યઃ સ બને સવનેતૃનાયકો જયતિ ॥ ૩૨॥

રક્ષોબદલનવિધૌ દક્ષો વક્ષોજગિરિહરિર્લક્ષ્મ્યાઃ
પક્ષો(૩૦) જયતિ વલક્ષોઽસ્માકમધિક્ષોણિ શક્રનીલનિભઃ ॥ ૩૩॥

(૩૧)અવ્યયમદસ્યુગોચરમુર્વપિ ન મદપ્રદં પદં પ્રમુદામ્ ।
વિત્તમનીહમનોહરમસ્માકં ચિત્તમાત્મસાત્કુરુતે ॥ ૩૪॥

અઙ્કુર(૩૨)હિતમમૃકરં શઙ્કરહિતમનિશમેધમાનકલં
મિત્રં સ્વયા શ્રિયાપ્યુપકુર્વાણમહં ભજે ચકોરશિશુઃ ॥ ૩૫॥

કતિ ન જટિલા વટા ઇવ ધન્વધરાઃ કતિ ન કાનને શબરાઃ?
એકઃ કોઽપ્યજકુલજઃ (૩૩)કપર્દિસુમધન્વનોઃ શ્રિયં હરતિ ॥ ૩૬॥

યામે રજનેશ્વરમે યા મેઘનિભા સુનિસ્પૃહૈશ્ચિન્ત્યા ।
સામેતરૈરુપાયૈઃ(૩૪) સા મે ભૂતિર્ન કૈશ્ચિદપિ લભ્મા ॥ ૩૭॥

(૩૫)દ્યાવાભૂમિભ્યામિવ યાભ્યાં સ્ત્રીભ્યામપિ પ્રજાઃ સુચિરં ।

નિર્ભયમરાજકેઽપિ ત્રાતા વાં પાદુકે નમસ્યામઃ ॥ ૩૮॥

(૩૬) ભરત ! । ભગવતા ગુરુણા સુશિક્ષિતનયો યુવાપ્યધીરસ્ત્વં ।
મન્યે ધન્યે ત્વત્તો જડેઽપિ ખલુ પાદુકે સમે વ્યસને ॥ ૩૯॥

ભો (૩૭)યાજ્ઞવલ્ક્યશિષ્ય ત્વાં નૈવ યથા જહાતિ સમિષ્ઠા ।
જામાતરં તથા તે કન્યાનન્યા સતી બને ભવને ॥ ૪૦॥

લબ્ધા વિરાધ ! । ભવતા સીતાઽપાત્રેણ(૩૮) મૃત્યવે ન મુદે ।
કપટપટુના ક્ષણં સુરપઙ્ક્તાવિવ રાહુણા સુધાધારા ॥ ૪૧॥

જઙ્ગમનિર્જરતરુણા(૩૯) તરુણારુણપાદપલ્લવેન સહ ।
દૃષ્ટા કનકવ્રતતિર્વ્રતતીર્થતપઃફલપ્રદા વનિભિઃ ॥ ૪૨॥

ધન્વી જટી ફલાશી તન્વીરત્નેન(૪૦) સાદરં સતતં ।
અન્વીયમાન ઈદૃક્સન્વીતભયઃ સતામગાદુટજમ્ ॥ ૪૩॥

(૪૧)અભ્રામલદીપ્તિ મહો બભ્રામ ચિરાય દણ્ડકાભૂમૌ ।
દભ્રામધશ્ચકાર શ્વભ્રામયમલિનશશધરજ્યોત્સ્નામ્ ॥ ૪૪॥

(૪૨)સહસૈવ પઞ્ચવવ્યાં હરિણા હરિણાનુયાયિના સ્વગુહા ।
સાપિ ચ મુક્તા મુક્તા નીતા બત! વઞ્ચકેન કેનાપિ ॥ ૪૫॥

નીતા(૪૩) શુનાશુ નાશાયાત્મન એવાસિ પુત્રિકે! । મોહાત્ ।
હાસ્યતિ નો નિધનમૃતે ન મૃતે સ્વયમત્ર કિં તવોત્કર્ષઃ? ॥ ૪૬॥

(૪૪)તદિદમુપસ્થિતમચિરાદ્યદવોચોઽનાગસં કિમપ્યમ્બ! ।
પાત્રે દાનં ક્ષેત્રે બીજં બહુ ભવતિ ગુપ્તમુપ્તમપિ ॥ ૪૭॥

તપ્તો વાચા લતયા વિષમય્યા ભુક્તયેવ બાલમૃગઃ ।
શપ્તો વાચાલતયા કથમનઘોઽપ્યેષ દેવરો દેવિ! ॥ ૪૮॥

એકં ક્ષણમપિ ધીરૈરપિ નૂનમસહ્યવેદના વાચઃ(૪૫)
સ યદપસસાર સહસા સૌમિત્રિઃ સાશ્રુરાશ્રમાદાશુ ॥ ૪૯॥

દસ્યો! । ક્વ ત્વં યાસ્યસિ હૃત્વા રત્નં જગન્નિવાસસ્ય ?
કુત્ર(૪૬) નિલીય સ્થેયં મત્સ્યેનાગસ્કૃતા પયોરાશેઃ ? ॥ ૫૦॥

શ્રદ્ધ્યાં(૪૭) કથમનયા સ્યક્તાં છાયામિવ સ્વવત્સલતાં ।
ગરલપ્રસવાં કથયસ્યમૃતમયીમાદિતોઽપિ વસ્સ! લતામ્ ॥ ૫૧॥

સા(૪૮) કુત્ર પર્ણશાલે! । માલેહાથૈવ યા મયા નિહિતા?
લબ્ધા મિથિલાજાનેર્જાને ન્યાસાપહારિણીં ત્વાહમ્ ॥ ૫૨॥

ગોદાવરિ ! । સા ક્વ ગતા? જગતા સત્યેતિ સંસ્તુતા ત્વમસિ ।
તમસિ(૪૯) ચ્યુતરત્નં જનમઞ્જનદાનેન મામનુગૃહાણ ॥ ૫૩॥

(૫૦)કાસારકુન્દકદલીકીરકેસરિકૃષ્ણસારકેકિપિકૈઃ ।
અલિચમ્પકબન્ધૂકૈઃ શૂન્યે બત! સુન્દરી વિભજ્ય હૃતા ॥ ૫૪॥

(૫૧)અયિ! । તે દયિતે! મયિ તેઽમી સન્તિ કૃતપ્રતિક્રિયાઃ કૃતિનઃ ।
ગુણલવજિતોઽમૃતયુતિહારણઃ કરિણસ્તથૈવ કેસરિણઃ ॥ ૫૫॥

યદ્યપિ ગણરાત્રં ગતમથૈવાહ સમાગતોઽસ્મિ વનં ।
યદ્રહિતો(૫૨) ભદ્રહિતોત્સવસુવસત્યા શ્રિયા તયા સત્યા ॥ ૫૬॥

મૃગ! । યામીક્ષણવિજિતઃ શક્ષ્યસિ નોદીક્ષિતું બત! ત્રપયા ।
મૃગયામિ ક્વ નુ તાં વદ મિત્રમહં તે વનેચરો રામઃ ॥ ૫૭॥

લીનાસિ કિમેકાન્તે કાન્તે ! । કાં તે વ્યલઙ્ઘયં વાચં ?
વિરહજ્વરવિપદયિ! તે દયિતે! દયિતેઽતિદુઃસહાઽધીરે ॥ ૫૮॥

સત્યન્તકેઽપ્યરાતૌ સત્યં સોઢું તમપ્યહં ધીરઃ ।
(૫૩)સત્યગ્ચિતાગ્નિ! દૂયે સત્યગ્ચલતોંઽતરેઽપિ કિં વિરહે ? ॥ ૫૯॥

દૃષ્ટં(૫૪) યત્સત્યાગો વત્સ! । ત્યાગોચિતં મયિ પ્રિયયા ।
તત્કિં ત્વયા ન લક્ષિતમક્ષિ તવાપ્યનલસં મદાચરણે? ॥ ૬૦॥

વીજય મામઞ્ચલતઃ (૫૫)પઞ્ચલતઃ પલ્લવોઽમૃતવતતેઃ ।
સુદતિ! શયસ્તે વ્યજનાન્મુદતિશયસ્યૈકહેતુરબ્જકૃતાત્ ॥ ૬૧॥

કાનન! । તદાસિ નન્દનમધુના પિતૃકાનનં સુવિસ્પષ્ટં ।
અહમપિ (૫૬)હરિરભવં તામૃતે વિદાનીં શ્રિયં મહાભૂતઃ ॥ ૬૨॥

નિત્યં નિરન્તરાભ્યાં સુદતિ ! । ગુરુભ્યાં નિસર્ગકઠિનાભ્યામ્ ।
ધ્રુવમુપદિષ્ટં હૃદયં તવ સ્તનાભ્યાં સ્વભાવમૃદુલમપિ ॥ ૬૩॥

કિં દોષાકર! । વચ્મ્યહમિન્દો! નિન્દોચિતં કુરુ સ્વૈરં ।
યસ્ય શ્રિયાસિ સુભગસ્તસ્મિન્મિને ગતેઽસ્તમુલ્લસસિ ॥ ૬૪॥

વત્સ! । ન યદિ લલના કિં લોલેનાલિઙ્ગિતા મયા લતિકા ।
અસ્તુ તદ(૫૭)નુકૃતિદયિતામહમેનાં ઝટિતિ નોત્સહે હાતુમ્ ॥ ૬૫॥

અસવઃ ક્વ સ વઃ પ્રિયસખ(૫૮) એકાકી જન ઇતો ગતો દૂરં ।
અલસા જલસારસયોર્નહિ શોભા જીવનં મિથો વિરહે ॥ ૬૬॥

(૫૯)નીતા વધૂર્ન દસ્યોસ્નાતેત્યલમાર્ય! । તેન તાપેન ।
શાપેનેવ સખા તેઽધર્મેણ હતોઽસ્યનેન પાપેન ॥ ૬૭॥

કશ્ચન યુવા તપસ્વી વિરહી પરિષસ્વજે તરુવતતીઃ ।
વ્રતતીર્થપરા મુનયોઽનુનયોદારોક્તયસ્તમાનર્ચુઃ ॥ ૬૮॥

(૬૦)અમૃતમમૃતફલમદરં બદરં પ્રેરણા બભક્ષ ચિત્રમિદમ્ ।
તદપિ ચ શબરીદત્તં મત્તં મન્ધ્વં ન મામિયં મુનિવાક્ ॥ ૬૮॥

કિમધિકમતોઽસ્તિ ચિત્રં મિત્રં વિપિનૌકસાં શ્રુતિરહસ્યં ।
(૬૧)યદ્દર્શનાય યતિભિઃ પતિભિઃ પૃથ્વ્યા મૃગાયિતમરણ્યે ॥ ૭૦॥

વાસવવૈભવમૂનં ચક્રુઃ કપયોઽપ્યહોઽદ્ભુતં શ઼ૃણુત ।
પપુરમૃતમાગલં(૬૨) દદુરગનગખગમૃગરિપુભ્ય ઉત્સવતઃ ॥ ૭૧॥

પત્યુઃ(૬૩) કરતસ્ત્વામપ્યુટજાન્મામિવ કથં બલાદ્ધૃતવાન્ ।
મ સ મુદ્રેઽત્ર સમુદ્રે નૌ નૌવત્રાતુમાગતઃ કસ્માત્ ? ॥ ૭૨॥

સ્વપતિસ્ત્વસતા હન્તા હન્તાહં તાપમનુભવામ્યબલા ।
(૬૪)તુલ્યૈવાધિસમુદ્રે મુદ્રે મુદ્રેખયા લિખિતયાપ્સુ ॥ ૭૩॥

અખિલપ્રશ્રયપાત્રં સખિ! । લક્ષ્મીવાન્સ લક્ષ્મણઃ કુશલી ।
(૬૫)નખિલક્ષગુરુર્હરિરિવ મખિલબ્ધાસ્નઃ સ ચાપિ વીરમણિઃ ॥ ૭૪॥

સ્વં ભાગમિવાદાતું હરિરિવ હારણેષ્વિહાગમિષ્યતિ કિં ।
માં સાન્ત્વયિતુમનાથાં નૂનં ત્વં પ્રેષિતાસિ દયિતેન ॥ ૭૫॥

દ્રષ્ટું માતરિહ ત્વામાર્યપ્રહિતોઽહમાગતો દૂતઃ ।
(૬૬)સૂતઃ પ્રથમં રવિણા નલિનીમિવ જયતિ સોઽસ્ત્રિપુરુહૂતઃ ॥ ૭૬॥

ગ્રીષ્મે ગજ ઇવ સરસીં ત્વાં સીતાં કાનનેષ્વનાસાદ્ય ।
(૬૭)શ્રાન્તસ્વાન્તઃ શ્રાન્તઃ કાન્તઃ કાં તદ્યથાં બ્રવીમ્યમ્બ! ॥ ૭૭॥

ગોષ્પદમિવ તીર્ણ ઉદધિમયમહમબલોઽપિ યસ્ય દાસચરઃ ।
(૬૮) કથમર્ણવભેકમરિં પત્રિપતિજવસ્તરન્ન તસ્ય શરઃ ॥ ૭૮॥

(૬૯)અદહદજભવપ્રહિતોઽનન્તવલોઽરિપુરમાશુગઃ સ હરિઃ ।

અયમપિ તથૈવ દૂતઃ પશ્યત પીતામ્બરશ્રિયા શ્લિષ્ટઃ ॥ ७९॥

કોઽપ્યાહ યતો ધર્મસ્તતો જયઃ સત્યમિતિ કવિપ્રવરઃ ।
(७०) યત્ખલુ વિજિતઃ સદનુગકપિના સ પિનાકિવરસુરોન્મત્તઃ ॥ ८०॥

(७१)ન કપિરનુક્તોઽગ્નિરપિ ન પરવાન્વનભઙ્ગમરીપુરીદાહં ।
કિં તુ ક્ષુબ્ધાઃ સત્યા નિશ્વાસા એવ ચક્રુરત્યુષ્ણાઃ ॥ ८१॥

(७२)અસુરપ્રિયાભિરારાત્પાખણ્ડોક્તિભિરશઙ્કમશિવાભિઃ ।
ચાર્વાકાદીનામુક્તિભિઃ પરિવૃતા દૂષિતા આસીત્ ।
રુદ્ધા વને કલાવુપનિષદિવ કુટિલાશયાભિરેકસતી ॥ ८२॥

રક્ષતિ કથમપિ તન્વી દેહાદધિકં શ્રુતી દૃશાવપિ સા ।
આરિસુન્દરીવિલાપં મધુરં ત્વામપિ ચ પાતુમમૃતમિવ ॥ ८३॥

કપયઃ(७३) સ પયઃ કેવલમબ્ધેસ્તીર્ણઃ સખા ન બાહુભ્યાં ।
વ્યક્તં નક્તઞ્ચરવરબલમપિ કપિસૈન્યદૈન્યહરતેજાઃ ॥ ८४॥

આર્યામપશ્યમહિતસ્ત્રીરુદ્ધાં તાં નિતાન્તતાન્તતનું ।
(७४)અધિકણ્ટકારિકાવૃતિ ધર્મ ઇવોત્ખાતરોપિતાં જાતિમ્ ॥ ८५॥

(७५) દગ્ધુમના અપ્યબલા બાલતૃણાનિ ક્ષણાદનાર્દ્રાણિ ।
દહનશિખેવ સખાયં ત્વામેવાસ્તે સતી પ્રતીક્ષન્તી ॥ ८६॥

બન્ધુરપિ(७६) દસ્યવે યઃ સંશ્રયદઃ સ જડધી રિપોરિષ્ટઃ ।
કિં પ્રાર્થ્યતેઽતિવેલં બધ્યો લઙ્ઘ્યસ્ત્વયા જનૈશ્ચાન્યૈઃ ॥ ८७॥

રાજ્ઞા ગુરુણા ત્યક્તો ન વિષયસક્તઃ સતાં મતોઽત્યર્થં ।
દૈવાત્ખલુ સમશીલવ્યસનઃ પ્રાપ્તઃ સખા વિભીષણ! તે ॥ ८८॥

જીવેત્યાંશીરુચિતા દાતું નમતેઽવિચાર્ય દત્તા શ્રીઃ ।
ન મનાપાત્રવિચારો નમનાત્સર્વસ્વદાનમાશ્ચર્યમ્ ॥ ८९॥

રામ ! । ત્વયા સ્વયાત્ખલુ સમદુઃખસુખઃ સખા(७८) સમાસાદિ ।
વ્યસનમુદધિં સુદુસ્તરમન્યોન્યબલેન યત્સુખં તીર્ણૈઃ ॥ ९०॥

(७९)અવિલન્ઘિતમર્યાદં બબન્ધ બન્ધું ગુરું લલઙ્ઘ બલી ।
ભક્તં જઘાન શમ્ભોર્મુનિસુતમપિ કોઽપિ હન્ત ! દારકૃતે ॥ ९१॥

વન્દે તં દેવીનાં હૃતશોકં રાક્ષસીવિલાપગુરું ।
(८०) જગુરુચ્છ્વૃત્તયો યં તાપાપહમનભોગિનામગુરુમ્ ॥ ९२॥

જટિલસ્તમાલનીલો વનવાસિસખઃ (૮૧)પતઙ્ગકુલપાલઃ ।
કશ્ચન દદાહ ખેચરભૂભૃતમધિજલધિ તાપહા દાવઃ ॥ ૯૩॥

મેઘેન કેનચિદહો! । ધનુષ્મતા ભૂગતેન શરવૃષ્ટ્યા ।
જલપૂર્ણા (૮૨)વાહિન્યઃ ખગમા નિર્જીવનીકૃતાઃ સિન્ધૌ ॥ ૯૪॥

તૃણકાનનં દદાહ ન કીલાલનદીઃ સસર્જ તાપહરઃ ।
કશ્ચન પતઙ્ગકુલજસ્તમાલનીલસ્તનૂનપાત્તરુણઃ(૮૩) ॥ ૯૫॥

કપિસબ એકઃ કશ્ચન ચકે (૮૪)નાકૌકસાં ક્ષણાત્કુશલં ।
યસ્કુલિશકરસુદુષ્કરમકાલકૂટાનશૂલશિખિસાધ્યમ્ ॥ ૯૬॥

આસ્તાં યદ્વધમકરો રક્ષોધિપતે રણે પણેન ત્વં ।
સોઽપિ પ્રાજ્યં રાજ્યં પ્રાણાન્પ્રજહી ન તુ પ્રતિજ્ઞાં સ્વામ્ ॥ ૯૭॥

આપદમામું સ્પૃષ્ટસ્તાપદમુગ્રં કથં પરકલત્રં ।
પાપદવાનલદગ્ધો હા! પદમખિલશ્રિયાં સ્વમપિ વીર(૮૫)! ॥ ૯૮॥

(૮૬)અન્યકલત્રં વિષમં વિષવહ્નેરપિતમાં યદામૂલં ।
સ્પૃષ્ટ્વૈકદૈવ દગ્ધો ગુણદોષજ્ઞોઽપિ બત! સમન્ત્રિકુલઃ ॥ ૯૯॥

નક્તમિવાશોકવનેઽપ્યનિરીક્ષ્ય પ્રિયતમં (૮૭)તમાન્તાન્તા ।
દૃષ્ટ્વા તુ વહ્નિકુણ્ડેઽપ્યહનીવ સરોજની બભૌ કાન્તા ॥ ૧૦૦॥

(૮૮)સુહૃદો વિયોગયોગૌ નાન્યો સ્તસ્તાપતોષયોર્હેતુઃ ।
પ્રમદવને ગ્લાનિમિતા તુષ્ટિં દહનેઽપિ યત્પ્રિયે દૃષ્ટે ॥ ૧૦૧॥

વિમલકનકમૂર્તિરિવ જ્વલનેઽપ્યસિ દેવિ ! । (૮૯)લબ્ધપરભાગા ।
મા ગા વિષાદમધિકાં નુતિમાપ્તા ત્વં જગત્સુ યદનાગાઃ ॥ ૧૦૨॥

(૯૦)અવતાદ્વિભીષણસ્ત્વાં લઙ્કે ! । યે કેસરીવ મેરુગુહાં ।
આકલ્પમચલપદભાગેષ પતિર્ધ્રુવસખસ્તવાસ્તુ સુખી ॥ ૧૦૩॥

ભવમિવ દુસ્તરમુદધિં તીર્ણાસ્ત્વાં દેવિ ! । (૯૧)સુગતિમિચ્છન્તઃ ।
અવલમ્બ્ય સ્વોત્પાદિતમચલાત્માનં સુપુત્રમિવ સેતુમ્ ॥ ૧૦૪॥

(૯૨)સુષમાજિતઘનશમ્પે પમ્પેયં પેયવાણિ ચિરમસ્યાં ।
સુદતિ ! રુદિતમયિ શિખિભિર્નૃત્યદ્ભિરસદ્ભિરિવ ભૃશં મુમુદે ॥ ૧૦૫॥

પઞ્ચવટિ ! । ત્વય્યુષિતાઃ (૯૩)શમયોધ્યાયામિવામ્બ ! લબ્ધાઃ સ્મઃ ।

મામિયમિતારિકીર્ત્યા સહ સિન્ધું સ્વરપગેવ કાલિન્ધા ॥ ૧૦૬॥

ભો માતર્ગોદાવરિ! । (૯૪) યાવરિકરિહરિપતી સતીસહિતૌ ।
સુચિરમુષિતૌ ત્વદઙ્કે કૌસલ્યાયા ઇવામ્બ ! તાવેતો ॥ ૧૦૭॥

તુભ્યં બદ્ધોંઽજલિરયમીશશિરઃસારસાસને(૯૫) દેવિ! ।
ગુર્વીમુલ્લમ્બ્ય ત્વાં તીર્ણાઃ કથમાપદં પ્રતિજ્ઞા સ્વામ્ ॥ ૧૦૮॥

તૃષિતોઽસિ બાલચાતક(૯૬)! । તાત! કરુણયાગતોઽદ્ય જીવનદઃ ।
પશ્યોન્મીલય નયને નય નેહામૃતમનેહસં પાતુમ્ ॥ ૧૦૯॥

શ ૃણુત મયૂરા(૯૭) યં પ્રિયમીક્ષિતુમત્યન્તમુસ્સુકા મુદિરં ।
સ મહાભાગત આગત ઉત્સવ એકાન્તિકેઽદ્ય નૃત્યધ્વમ્ ॥ ૧૧૦॥

સિંહાસન કિં હા! । સ ન પતિરદ્ય સ્મર્યતે મહેન્દ્રસખઃ(૯૮)
યેનાસ્યખિલનૃપતિપતિનતિભાજનમમૃતપાયિપતિયશઃ ॥ ૧૧૧॥

નાકે સાકેતયશોઽરુચિમમૃતરસેઽમૃતાન્ધસામકરોત્(૯૯)
સત્યે રસ્યેકપદં સ્વં તાણ્ડવપણ્ડિતં મૃડાનીશમ્ ॥ ૧૧૨॥

પસ્પર્શ પદા સાધ્વીં વિશ્વસ્તં વીરમપિ જઘાન વને ।
તસ્યાજ સતીં કોઽપીનવંશજાનાં સતાં મતઃ કુપતિઃ(૧૦૦) ॥ ૧૧૩॥

યદમૃતમમૃતજુષામપિ યચ્ચ સુખં યોગસમ્પદામતુલં ।
ઉપનિષદા યત્તત્વં તદયોધ્યાવાસિનો વિધેયમહો(૧૦૧) ॥ ૧૧૪॥

(૧૦૨)માતરયોધ્યે ! । ભુક્તાઃ પતયઃ પારેશતં ત્વયા સત્યા ।
સ્મરસિ કથં ન તદધુના મધુના નનુ મોહિતામુના પત્યા ॥ ૧૧૫॥

ઇતિ શ્રીરામનન્દનમયૂરેશ્વરકૃતા મુક્તામાલા સમાપ્તા ।

ટિપ્પણિ

* અષ્ટોત્તરં શતમપિ રામાયણાનિ વિરચ્ય શ્રીરામકથાગાનેઽતૃપ્ત ઇવ મયૂરકવિર્દાશરથિચરિતાદેવ કિયન્તશ્ચન પ્રસઙ્ગાન્ ક્રમેણોદ્ધૃત્ય વિધાલઙ્કારચમત્કૃતિયુતાન્

૧। તત્રાદૌ સ્વચિકીર્પિતખણ્ડકાવ્યસ્ય નિર્વિઘ્નપરિસમાપ્તયેઽવશ્યવિધેયં મઙ્ગલમાતનોતિ । પુણ્યશ્લોકેતિ । પુણ્યશ્લોકાઃ નલયુધિષ્ઠિરવૈદેહજનાર્દનાઃ તેષામન્ત્યનિર્દિષ્ટોઽપિ સર્વશ્રેષ્ઠો ભગવાન્ શેષશાયી વિષ્ણુસ્તસ્ય ચરણં વન્દે । તદ્ધિ સતાં સદાચારાણાં દેવાદીનાં શરણમાશ્રયસ્થાનમ્ । ન ચ તેષાં કદાચિદપિ તાપમકરોત્ । નતૌ ભક્તી યૌ નરોઽર્જુનઃ કપિશ્ચ હનૂમસ્તિયોઃ સખાયં મિત્રવદુપકારકમ્ । ખલાઃ દાનવાઃ તૈઃ અજિતમ્ । મખં યજ્ઞં વરદાનવ્રતવિત્તં વન્દે કરુણાસુધૈકપનચિત્તમ્ । લક્ષણયા યાગીયહવિર્દ્રવ્યં ભુઞ્જતે તે મખભુજો દેવાસ્તેષામાદ્યં

મહસ્તેજઃ । એતાદૃશં ભગવતો વિષ્ણોશ્ચરણમહં વન્દે । અત્ર રાક્ષસૈર્વિહતયજ્ઞત્વાદનશના દેવા ભગવન્તં શરણ્યં દાનવાનામજય્યમાદિનારાયણમાસાદ્ય તુષ્ટુવુરિતિ રામાયણકથાભાગો વ્યજ્યતે । એવમેવોત્તરત્રાપિ સમુચિતૈર્વિશેષણપદૈરેવ ક્રમેણ રામાયણી કથોપનિબદ્ધા મા ચ રસિકૈઃ સ્વયં સુખમૂહનીયા ।

૨। નિસ્પૃહાઃ નિર્ભયાશ્ચ યે સાધવસ્તેષાં વિત્તમ્ ।

૩। બહુભિર્નિર્ગુણૈઃ પુત્રૈરલં તૈર્ન કોઽપ્યર્થઃ સમ્પદ્યતેતિ ભાવઃ । પતિરથો દશરથસ્તુ ચતુર્ભિરેવ ગુણિભિઃ પુત્રૈઃ પુત્રિણાં શ્રેષ્ઠોઽભૂત્ । તથા બહુદાનામુદારાણાં ત્યાગિનામપિ શ્રેષ્ઠોઽભૂત્ । યતો યશરક્ષણાર્થં વિશ્વામિત્રેણ યાચિતોઽયં પુત્રૌ રામલક્ષ્મણૌ ધર્માર્થં યજ્ઞરક્ષણાર્થમદાત્ ।

૪। વિશ્વામિત્રસ્ય ગાલવપ્રમુખાઃ પ્રભૂતાઃ શિષ્યા આસન્ । સતતં ગુરુપારચરણબદ્ધાદરૈરપિ તૈર્ન તસ્માદ્બલાતિબલાખ્યે દ્વે વિદ્યે અધિગતે । રામસ્તુ સુબાહુપ્રમુખાન્નિહત્ય વિશ્વામિત્રમેકવારમેવ સન્તોષ્ય તે અધિગતવાન્ ઇતિ તસ્ય ગાલવાદિભ્યો બહુગુણત્વં સૂચ્યતે । અનુભૂતશ્ચાયમર્થો લોકે બહુશઃ । યથા રામ એવ વિશ્વામિત્રાદેતે વિદ્યે લબ્ધવાન્ ન ગાલવાદયઃ । યતઃ જલનિધેર્જલં પિબતાં મેઘ એવ શ્રેષ્ઠઃ સ એવ સર્વેષામધિકતરં વારિ લભતે ઇત્યર્થઃ ।

૫। કતમો દેવાનાં શ્રેષ્ઠ ઇતિ પૃષ્ટો ભૃગુવૈકુણ્ઠં ગત્વા શેષશાયિનં પરીક્ષિતુકામસ્તં પદા જઘાન । ભગવાંસ્તુ પ્રબુધ્ય તસ્ય પદં સંવાહયિતુમારેભે । તં ચ સમુચિતયાર્ચયા સમ્ભાવિતવાન્ । એવમેવાહલ્યાઽપિ પદા સ્પૃષ્ટે રામમર્ચન્તી કવિના નિર્દિશ્યતે । પદા સ્પૃષ્ટસ્ય પૂજનેઽહલ્યા ચ ભગવાન્ રામશ્ચ સતીર્થ્યૌ એકસ્યૈવ ગુરોરન્તેવાસિનૌ એકાચારૌ ચાસ્તામિત્યર્થઃ ઇતિ ।

૬। ઈશસ્ય શિવસ્યેદમૈશં ધનુર્બલાન્નાકૃષ્ટમપિ અબલયા સાતયાકૃષ્ટમપીતિ । ધ્વનિઃ । નુ વિતર્કે । કથં નુ ભગ્નમિતીશકોપપ્રસઙ્ગાદ્ભ્રાન્તમાનતકન્ધરં ચ રામં ભગવાન વિશ્વામિત્ર આલિઙ્ગ્યાભયમિવ દદૌ ધનુઃસજ્જીકરણાય કૃતેનાલ્પેનૈવાયાસેન ધનુર્ભગ્નમ્ । ભગ્ને ચ તસ્મિન્ શિવકોપમુત્પ્રેક્ષ્ય ભીતં રામં વિશ્વામિત્રઃ સાધુવાદન સમાશ્વાસયદિત્યર્થઃ ।

૭। સર્વસહાપિ ભૂમિસ્તસ્ય ધનુષો ઘોરેણ નિનાદેન ચકમ્પે । કિન્તુ બાલાપિ સીતા મુમુદે । રામસ્યોત્તીર્ણપણત્વમાલોક્ય તસ્યા આનન્દાતિશયોઽભૂત્ । બાલાપાત્યનેન સુલભભયત્વં દ્યોત્યતે ।

૮। યથા કચેન ગુરુણા બૃહસ્પતિના સઞ્જીવિન્યા યોગ કર્તું વિનાશોઽઙ્ગીકૃતસ્તથા ચાપેનાપિ શર્વસ્ય મતેન ગુરુણા રામેણાતુલયા સીતયા યોગં કર્તું વિનાશોઽઙ્ગીકૃતઃ । ચાપભઙ્ગાનન્તરં રામઃ સીતાં પર્યણયદિત્યર્થઃ ।

૯। હે જામદગ્ન્ય, બહુભુજ સહસ્રબાહું કાર્તવીર્યમહમજયીમીત ગર્વં મા કૃથાઃ । તત્કુલવિનાશે ચ દૈવમેવ કેવલં હેતુઃ । અત્ર દૃષ્ટાન્તઃ । બાહુરહિતોઽપિ કેવલં શિરઃસ્વરૂપોઽપિ રાહુઃ સહસ્રકરમપિ સવિતારં પર્વણ્યમાવાસ્યાયાં ગ્રસતે। જિતેઽપિ કાર્તવીર્યે રામસ્તે જેતુમશક્ય ઇત્યર્થઃ ।

૧૦। મહઃ ઉત્સવઃ ।

૧૧। કેવલમઙ્ગનયા શુભાઙ્ગ્યા સીતયા અનુજેન લક્ષ્મણેન ચાનુગતં પઙ્કેરુહદૃશં કમલલોચનં રામ વનગમનોદ્યતં વીક્ષિતું દ્રષ્ટુમઙ્કે સ્થિતં શિશુમપિ વિસ્મૃત્ય સ્ત્રીભિર્ધાવિતમિત્યહં (કવિઃ)શઙ્કે । ધાવિતમિત્યત્ર ભાવે નિષ્ઠાપ્રત્યયઃ ।

૧૨। અહં અધ્વન્ય વનેચર નાપમવેષ રામં ભજે । કીદૃશમ્ । ઘનવન્મેઘવત્ શ્યામલં નીલકાન્તિમ્ । અત એવ ઘનભ્રાન્ત્યા પ્રમોદાનૃત્યદ્ભિર્મયૂરૈઃ પરિવૃતમ્ । તથા ચ દુર્વાપુઞ્જવત્ હરિનીલમત એવ યવસપુઞ્જભ્રાન્ત્યા

એણકુલૈર્હરિણસમૂહૈરુપમૃતમ્ । તથા ચ અબ્જાનનં પદ્મમુખમત એવ પદ્મભ્રાન્ત્યા ભ્રમરવૃન્દેનોપમૃષ્ટમ્ ।
૧૩। સૂર્યવંશોદ્ભવાવપિ અમૃતકરી ચન્દ્રાવિતિ વિરોધઃ । અમૃતં નામ મોક્ષઃ હસ્તે યયોસ્તાવિતિ પરિહારઃ । ગૌરો લક્ષ્મણઃ સ્ફટિકશ્ચ । અસિતસ્તુ રામઃ ઇન્દ્રનીલશ્ચેતિ દ્વૌ વરમણિ ।
૧૪। યો માત્રા કૈકેય્યા અત્ર મા આસ્સ્વ મા તિષ્ઠત્યાલયાદ્ ગૃહાદ્વનં પ્રહિતઃ પ્રષિતઃ । યશ્ચ પિત્રાપિ આત્મનો ધર્મં દત્તપૂર્વસ્ય વરદ્વયસ્યાનુષ્ઠાનાત્મકં ત્રાતું પાલયિતું વન પ્રેષિતઃ । તં રામં કવયઃ પણ્ડિતા ધર્મજ્ઞેષુ શ્રેષ્ઠં જગુઃ । પિત્રાજ્ઞાપાલનાત્મકસ્ય ધર્મસ્યાનુષ્ઠાનાય રામો વનં વવ્રાજેતિ ભાવઃ । અત્ર આસ્વ ઇત્યેકસકારં રૂપં સર્વત્ર દૃશ્યમાનમશુદ્ધમ્ ।
૧૫। હે નિષાદ ગુહ રામો રાજ્યં પરિત્યજ્ય વનમાગતઃ ઇત્યત્ર કિમિતિ કિમર્થં તે વિષાદઃ । વિષાદ મા ભજસ્વેતિ ભાવઃ । યતઃ પશ્યાયમકકુલપાલઃ સૂર્યવંશ્યાનાં ધુર્યઃ રાજ્યં પરિત્યજ્ય વનમાગતોઽપિ વલ્કલધરોઽપિ બદ્ધજટોઽપિ નૃપોત્તમશ્રિયા રાજલક્ષ્મ્યા શ્લિષ્ટોઽવિરહિત એવ । વનં ગતં જટાવલ્કલધારિણમપિ રાજલક્ષ્મીર્ન ત્યક્તવતીતિભાવઃ ।
૧૬। સીતારામલક્ષ્મણાન્ વનં પ્રાપય્ય નિવૃત્તઃ સુમન્ત્રઃ કૌસલ્યામાહ । હે અમ્બ તપશ્ચરણેન કાર્શ્યં ગતા વનવાસિતપસ્વિનો રામદર્શનમેવ પરમં જીવિતફલં મન્વાના એતાવન્તં કાલમવાતિષ્ઠન્ત । તત્તેષાં તપશ્ચરણં સફલં ભવતુ ।
૧૭। વને સ્થિતોઽપ્યહં પિતુરુત્સઙ્ગે વર્તે । માતુઃ સઙ્ગે સન્નિધૌ ચાસ્મિ । પુરે સ્થિત ઇવ ચ સુખમનુભવામિ । ઇતિ ભવત્પુત્રો મન્યતે । તત્કિમિતિ હે દેવિ, આત્માનં કાનન ઇવ શૂન્યે ગૃહ વર્તમાનમર્મસ્થાઃ અમનુથાઃ ।
૧૮। હે અજકુલોત્તંસ દશરથ, ત્વં પુત્રં રામં "નન્દનવનં વ્રજ" ઇત્યાદિષ્ટવાન્ । સોઽપિ નન્દનશબ્દ સમ્બુદ્ધૌ વર્તમાનમવગત્ય વનં ગતઃ । ત્વં તુ નન્દનવનં ગતો મે પુત્રો ભવેદિત્યાશયાવિચાર્યેવ નન્દન સ્વર્ગ ગતઃ । વનં ગતે રામે દશરથઃ પઞ્ચત્વમગમદિતિ ભાવઃ ।
૧૯। દસ્રાવશ્વિનૌ દેવભિષજૌ । અસ્રમશ્રુ તેન આકુલે આક્ષિણી યસ્ય તાદૃશઃ ।
૨૦। રહોગતા મન્ત્રિણો મુનયોઽમરાધિપેન સહિતા દેવા અપિ ત્વાં સ્ત્રૈણં સ્ત્રીવશઙ્ગતં વદન્તિ ।
૨૧। હે અયોધ્યે ! ત્વં શોચ્યા શોચનીયા સમ્પન્ના । યતસ્ત્વદીયં સૌભાગ્યં પ્રકૃષ્ટમૈશ્વર્યં શ્રીરામરૂપમટવ્યાઽપહૃતમ્ । યદિ ત્વં પુનરાત્મનઃ પતિમિચ્છસિ તર્હિ ત્વમપિ વિપક્ષસ્ય સપત્ન્યા અટવ્યા વેષં ધારય । રામેણ પરિત્યક્તા અયોધ્યા વનવન્નિર્જના શૂન્યા ચ સમભૂદિતિ ભાવઃ ।
૨૨। હે ભરત સ્વગુણાનાં ભ્રાતૃપ્રેમાદીનાં પ્રકાશસ્ય હેતું કારણભૂતામિમાં તે માતરં માવમન્યસ્વ । યદ્યશોકસ્ય સેકાત્પાદાહતેઃ પ્રમદાપાદતાડનેનાધિકં કુશલં સદ્યો વિકસનરૂપં ભવનિ તર્હિ સા પાદાહતિરેવ વરમ્ । એવમેવ માતુસ્તે રામસ્ય વનં પ્રતિ પ્રવ્રાજનં તે ગુણાનાં પ્રકાશસ્ય કારણમભૂદતસ્ત્વયા નેયમવમન્તવ્યેતિ ભાવઃ ।
૨૩। અસ્ય નૃપસ્ય કા અન્યા અબ્જાસવમધુપી ન કાપિ ત્વદન્યેત્યર્થઃ । કિન્તુ હે દેવિ સરલે, ત્વમનયા દાસ્યા મન્થરયા હાસ્યાસ્પદતાં નીતેતિ યોજના ।
૨૪। નીતેઃ કુટિલનીતેર્યો મદસ્તસ્ય મતં ત્વયોદિતનુક્તમ્ । સિદ્ધિં ચ પ્રારિપ્સિતસ્ય દૃષ્ટ્વા ત્વયા મુદિતમ્ । અધુના ત્વસ્યાનયતરોર્ભોક્તુમલં પર્યાપ્તં ફલમુદિતં પ્રાદુર્ભૂતમ્ । હે મન્થરે કિમિતિ ત્વયા રુદિતમિતિ પ્રશ્નઃ ।

૨૫। શોક એવ દવજ્વલનો વનવહ્નિસ્તેનાવૃતં વ્યાપ્તં શુદ્ધાન્તઃ અન્તઃપુરમેવ વનં તદેવ એકઃ સંશ્રયઃ આશ્રયસ્થાનં યાસાં તત્સમ્બુદ્ધૌ । મૃગ્યઃ કૌસલ્યાદયઃ । જીવનં દદાતીતિ તાદૃશો મેઘઃ । મૃગ્યોઽન્વેષ્યઃ ।

૨૬। શોકશિખી શોકાગ્નિર્નિશ્વાસનેવ નિર્વાપ્યતે । કિન્તુ તૂષ્ણીકૈઃ શનૈઃ શનૈઃ પ્રવર્તમાનૈરશ્રુભિરેવ શમં યાતિ । “શોકક્ષોભે ચ હૃદયં પ્રલાપૈરેવ ધાર્યતે” ઇતિવત્ ।

૨૭। સુધૈકપરિપૂર્ણાત્સરસસ્તડાગાદપિ સરસો મધુરઃ આહ્લાદક ઇતિ યાવત્ । શમલં કલ્મષમ્ । દ્વિતીયત્ર શં અલં ઇતિ પદચ્છેદઃ ।

૨૮। કાપ્યનિર્વચનીયા તપસાં સિદ્ધી રામરૂપા નીલાપિ શ્યામાપિ ઇલા પૃથ્વી તસ્યા ધરં શેષમિન્દું પયોધિ ચ ગુણૈઃ સામાર્થ્યાહ્લાદકત્વગામ્ભીર્યાદિભિરુપહસતિ તાનતિશય્ય વર્તતે ઇત્યર્થઃ ।

૨૯। અવનેઃ પૃથિવ્યાઃ પ્રિયોઽપિ ભર્તાપ્યાદ્યો જામાતા સીતાપાણિગ્રહણેનેતિ વિરોધાભાસઃ । સવસ્ય યશસ્ય નેતારઃ ફલભોક્તારો દેવાસ્તેષાં નાયકો મુખ્યઃ ।

૩૦। પક્ષઃ સુહૃત્ । વલક્ષો યશસા ધવલઃ । અધિક્ષોણિ પૃથિવ્યામ્ ।

૩૧। અવ્યયં વિકારં ક્ષયં ચાગચ્છત્ । ઉર્વપિ પ્રભૂતમપિ મદપ્રદમ્ । અનીહાનાં વીતસ્પૃહાણાં મુનીનાં મનો હરતીતિ તાદૃશમ્ ।

૩૨। ચકોરશિશુર્બાલચકોરોઽહં અમૃતકરં અમૃતં મોક્ષો હસ્તે યસ્ય તં શ્રીરામચન્દ્રં ચન્દ્રં ચ ભજે ઇત્યન્વયઃ । અયં રામચન્દ્રોઽઙ્કુરહિતો લાઞ્છનરહિતઃ સ તુ સલાઞ્છનઃ । અયમનિશમેધમાના વર્ધમાનાઃ કલા યસ્ય તાદૃશઃ સ તુ કૃષ્ણપક્ષે ક્ષીયમાણકલઃ । તથા ચાયં સ્વયા શ્રિયા મિત્રમપિ સુહૃદમપ્યુપકુર્વાણઃ સ તુ મિત્રાત્સૂર્યાદાપ્તશ્રીર્ન તસ્યોપકરોતીતિ વ્યતિરેકઃ। શઙ્કુરહિતમિત્યુભયત્રાપિ સમાનમ્ ।

૩૩। કપર્દી શઙ્કરઃ સુમધન્વા કુસુમધમ્વા મદનસ્તયોઃ શ્રિયં હરતિ તાવપિ શ્રિયાતિશેતે ઇત્યર્થઃ ।

૩૪। સા મેઘનિભા ઘનશ્યામા મે ભૂતિરૈશ્વર્યં રામરૂપં સામેતરૈઃ સામાદિભ્યઃ શમધ્યાનાદિભ્યોઽન્યૈરુપાયૈર્ન સુલભેતિ યોજ્યમ્ ।

૩૫। પાદુકે ઇતિ સમ્બુદ્ધૌ દ્વિવચનમ્ । વાં યુવાં નમસ્યામઃ । અરાજકે દશરથે દિવં ગતેઽયોધ્યાયાં રાજાભાવાત્ । સ્ત્રીભ્યામપીતિ પ્રાયઃ સ્ત્રીણાં જ્યપાલનાનર્હત્વમ । સુચિરં ચતુર્દશ સમાઃ ।

૩૬। અત્રાધીતનીતિશાસ્ત્રોઽપિ યુવાપિ ભરતઃ આત્માનં પ્રજાપાલનકર્મણ્યસમર્થમમન્યત । પાદુકે તુ જડે અપિ તદનુષ્ઠિતવત્યાવિતિ ભરતસ્ય વ્યાજનિન્દા ધ્વન્યતે । વ્યસને શ્રીરામવિરહાખ્યે ઉભયોઃ સમે તુલ્યેઽપિ

૩૭। ભો યાજ્ઞવલ્ક્યશિષ્ય જનક, યથા સતિ બ્રહ્મણિ નિષ્ઠા ત્વાં ન જહાતિ તથા તે કન્યાપિ ભવને વા વને વાનન્યપરાયણા સતી જામાતરં રામચન્દ્રં ન મુઞ્ચતિ ।

૩૮। અપાત્રેણાનર્હેણ ।

૩૯। વનિભિસ્તપસ્વિભિઃ વ્રતતીર્થતપસાં ફલપ્રદા તરુણૌ નૂતનૌ અરુણાવાતામ્રૌ પાદૌ પલ્લવાવિવ યસ્ય તાદૃશેન જઙ્ગમેન ચલેન નિર્જરતરુણા સુરદ્રુમેણ રામેણ સહ કાઽપિ કનકવ્રતતિઃ સ્વર્ણલતા સીતાખ્યા દૃષ્ટેત્યર્થઃ ।

૪૦। તન્વીરત્નેન રમણીમણિના સીતયાન્વીયમાનોઽનુગમ્યમાનઃ ।

૪૧। અભ્રં-મેઘસ્તદ્વદમલા કાન્તિર્યસ્ય તત્ । ઘનશ્યામં મહો રામચન્દ્રાખ્યં શ્વભ્રૈર્ગર્તૈરામયેન રાજયક્ષ્મણા વ મલિના કાન્તિર્યસ્ય તસ્ય શશલાઞ્છનમ્ય જ્યોત્સ્નાં પ્રકાશં દમ્રામલ્પામધશ્ચકાર તિરશ્ચકાર । ચન્દ્રાદપ્યતિસુન્દરો રામ ઇતિ

વ્યતિરેકઃ ।

૪૨। હરિણાનુયાયિના માયામૃગમનુસરતા કેનાપિ હરિણા સિંહેન રામચન્દ્રેણ ચ આત્મનો ગુહા નિવાસસ્થાનં સાપિ મુક્તા મૌક્તિકં સીતારૂપં મુક્તા હારિતા । સા ચ મુક્તા કેનાપિ વઞ્ચકેન જમ્બુકેન રાવણેન ચ નીતા ।

૪૩। હે પુત્રિકે સીતે! શુના રાવણેન ત્વમાત્મનો આશુ નાશાયૈવ નીતાસિ । સ શ્વા રાવણસ્ત્વાં નિધનમૃતે મરણાદૃતે ન હાસ્યતિ ન પરિત્યક્ષ્યતિ । સ્વયમેવાસ્મિન્ન મૃતે સતિ તવ ગુણાનામુત્કર્ષઃ સમ્ભવેત્કિમ્ । નૈવેત્યર્થઃ । અનનુષ્ઠિતે હિ રાવણેન મરણાપાદકે સીતાપહરણાખ્યે તદ્વિલોભનાખ્યે ચ કર્મણિ તવ ગુણાનામુત્કર્ષોઽવિદિત એવ સ્યાદિત્યર્થઃ ।

૪૪। હે અમ્બ સીતે । ત્વમનાગસં નિરપરાધમપિ લક્ષ્મણં યદ્દુરુક્તમવોચસ્તસ્યૈવેદમુપસ્થિતં ફલમ્ । યતો ગુપ્તં પાત્રે દાનં ક્ષેત્રે ગુપ્તમપ્યુક્તં નિક્ષિપ્તં બીજં બહુલીભવતિ ।

૪૪। શપો નિન્દિતઃ । દેવરો ભર્તુર્ભ્રાતા ।

૪૫। વાચો દુષ્ટવાચઃ ।

૪૬। પયોરાશેઃ સમુદ્રસ્યાપરાપ વિધાય મત્સ્યઃ ક સ્થાસ્યતીત્યર્થઃ ।

૪૭। રામો લક્ષ્મણં વક્તિ । હે વત્સ, અનયા મીતયા છાયેવ સદા સન્નિહિતા સ્વવત્સલતા ત્યક્તા ઇત્યહં કથં શ્રદ્દધ્યાં કથં વિશ્વસ્યામ્ । યતસ્ત્વં હિ આદિતઃ પ્રભૃતિ જન્મન આરભ્યામૃતમયીં લતાં ગરલપ્રસવાં વિષમયીં કથયસિ । નિદર્શનાલઙ્કારઃ ।

૪૮। સીતામપહૃતાં વિજ્ઞાય વિલપન્ રામઃ પર્ણશાલાં સીતાગતં પૃચ્છતિ । યા માલા સીતારૂપા મિથિલાજાનેર્જનકાદધિગતા મયા અથૈવાત્ર નિહિતા ત્વયિ ન્યસ્તા સા ક્વ વર્તતે ? અહં ત્વા ત્વાં ન્યાસાપહારિણીં ન્યાસમપહરતિ તચ્છીલાં જાને । ત્વયૈવ મે ન્યાસોઽપહૃત ઇત્યહં તર્કયામીત્યર્થઃ ।

૪૯। નમસ્યન્ધકારે ચ્યુતં રત્નં સીતાખ્યં યસ્ય તં મામાઞ્જનસ્ય દિવ્યદૃષ્ટિપ્રદસ્ય દાનેનાનુગૃહાણ મય્યનુગ્રહં કુરુ ।

૫૦। કાસારાદિષુ વર્તમાના ગુણાસ્તૈઃ સીતાયા અપહૃતા ઇતિ દ્યોતયન વિલપતિ । અસ્મિન્ શૂન્યે વિપિને સા સીતા કાસારાદિભિર્વિભજ્ય હૃતા । કાસારે ગમ્ભીરાશયત્વં, કુન્દકલિકાસુ દન્તપઙ્ક્તિસામ્યં, કદલ્યામૂરુદ્વયસાદૃશ્ય, કારણિ ગમનં, કેસરિણિ કટી, કૃષ્ણસારે આયતલોચનત્વં, કેકિનિ કેશપાશાનુકારિતા, પિકે સ્વરઃ, અલિષુ કટાક્ષનીલિમા, ચમ્પકે નાસિકાવંશસારલ્યં, બન્ધૂકે ચાધરરાગ ઇતિ ગુણાનાં દર્શનાત્ ।

૫૧। તેઽમી કાસારાદયો મયિ કૃતપ્રતિક્રિયાઃ કૃતવૈરનિર્યાતનાઃ કૃતિનો ધન્યાઃ સમ્પન્નાઃ ।

૫૨। ભદ્રં કલ્યાણં હિતોત્સવઃ આનન્દસમયસ્તયોઃ સુવસત્યા સીતયા રહિત ઇતિ યોજના ।

૫૩। સતિ અઞ્ચિતાનિ પ્રશસ્તાન્યઙ્ગાનિ યસ્યાઃ સા તત્સમ્બુદ્ધૌ । પદદ્વયમપિ સમ્બોધને । અઞ્ચલતઃ વસ્ત્રતોઽપ્યન્તરે સતિ અહં દૂયે ઇતિ યોજના ।

૫૪। હે વત્સ લક્ષ્મણ! અપિ દૃષ્ટં ત્વયા યત્સત્યા પતિવ્રતયાપિ પ્રિયયા મયિ ત્યાગોચિતમાગો દૃષ્ટં ઇતિ યોજનીયં। તદાગસ્ત્વયાપિ ન લક્ષિતં કિં। યતસ્ત્વદીયમપિ નયનં મદાચરણે સદા બદ્ધલક્ષ્યમ્ ।

૫૫। હે સુદતિ તે શયસ્તવ પાણિરમૃતવલ્લ્યાઃ પઞ્ચલતઃ પઞ્ચશાખઃ પલ્લવઃ અબ્જકૃતાત્ પદ્મનિર્મિતાદપિ વ્યજનાન્મુદોઽતિશયસ્ય હેતુઃ ઇતિ યોજ્યમ્ ।

૫૬। હરિરિન્દ્રઃ ।

૫૭। તસ્યાઃ સીતાયા ગુણાનાં માર્દવાદીનામનુકરણેન દયિતા પ્રિયા ।

૫૮। પ્રિયઃ સખા પ્રિયમિત્રમ્ । અલસા ઇતિ સમ્બુદ્ધિપદમ્ । જલં ચ સારસં કમલં ચ તયોઃ ।

૫૯। આર્ય હે જટાયો ! નીતા વધૂઃ સ્નુષા સીતા દસ્યો રાવણાન્ન ત્રાતેત્યલં સન્તાપિતેન । યતસ્ત્વમાત્મનઃ સખા દશરથો યથા શાપેન હતસ્તથા પાપેન રાવણેનાધર્મેણ ત્વં હતઃ ।

૬૦। અમૃતં રામો મોક્ષરૂપઃ। અદરં ભીતિરહિતમ્ । બભક્ષેત્યપાણિનીયમ્ । મન્ધ્વમિત્યપ્યપાણિનીયમ્ । મુનિવાગ્ વાલ્મીકિવચઃ ।

૬૧। યતિભિઃ પૃથિવ્યાઃ પતિભિર્નૃપૈશ્ચ યદ્દશનાયારણ્યે મૃગવદાચરિતમ્ ।

૬૨। ગલં મર્યાદાકૃત્યાગલમાકણ્ઠમ્ । ઉત્સવતો મુદા ।

૬૩। રામમુદ્રાં વીક્ષ્ય હનૂમન્તં ચાદૃષ્ટ્વા સીતા મુદ્રાં પ્રતિ બ્રૂતે । હે મુદ્રે, યથા રાવણ ઉટજાન્માં હૃતવાંસ્તથા ત્વામપિ પત્યુઃ કરતઃ કથં હૃતવાનિતિ પ્રશ્નઃ । સ શ્રીરામઃ સમુદ્રે નૌવત્ નૌ આવાં ત્રાતું કસ્માન્નાગતઃ ઇતિ યોજના ।

૬૪। આધિસમુદ્રે મનોવ્યથાસમુદ્રે મુદ્ આનન્દઃ અપ્સુ લિખિતયા રેખયા તુલ્યઃ ઇત્યન્વયઃ ।

૬૫। નખિનાં લક્ષં તત્ર ગુરુઃ શ્રેષ્ઠો હરિરિવ સિંહ ઇવ । મખિનો વિશ્વામિત્રાલ્લબ્ધાન્યસ્ત્રાણિ યેન સઃ ।

૬૬। સૂતોઽરુણઃ । અસ્ત્રિષુ પુરુહૂતઃ ઇન્દ્રઃ શ્રેષ્ઠ ઇત્યર્થઃ ।

૬૭। શ્રાન્તસ્વાન્તઃ ખિન્નચેતાઃ ।

૬૮। પત્રિપતિર્વૈનતેયસ્તસ્યેવ જવો યસ્ય સઃ શરઃ અર્ણવસ્થં ભેકમિવ ક્ષુદ્રમરિં કથં ન જયેદિત્યર્થઃ ।

૬૯। આશુગો હરિર્બાણરૂપધારી વિષ્ણુરજો યો ભવઃ શિવસ્તેન પ્રહિતઃ પુરા મયાસુરનિર્મિતં પુરમદહત્ । તથૈવાયં હરિર્વાનરો હનૂમાન્ અજભવેનાજકુલોત્પન્નેન રામેણ પ્રહિતો લઙ્કાપુરમદહત્ । એવમયમપિ પીતામ્બરસ્ય વિષ્ણોઃ શ્રિયા યુક્તઃ ।

૭૦। સન્તઃ અનુગા કપયો યસ્ય તેન રામેણ। પિનાકિવરઃ એવ સુરા તયોન્મત્તઃ ।

૭૧। કપિરશોકવનિકાભઙ્ગં નાકરોદ્યતઃ સોઽનુક્તઃ અનાદિષ્ટઃ । રામેણેત્યર્થાત્ । નાપ્યગ્નિઃ શત્રુપુરીમદહત્ । સોઽપ્યસ્વતન્ત્રો ભગવદિચ્છાવૃતિત્વાદસ્યેતિ ભાવઃ । કિન્ત્વેતદ્ દ્વયમપિ ક્ષુબ્ધાઃ સત્યાઃ સીતાયા નિશ્વાસા એવ ચક્રુરિતિ યોજનીયમ્ ।

૭૨। એકસતી પતિવ્રતાશ્રેષ્ઠા સીતા આરાત્સમન્તાત્ કુટિલાયાભિર્દુર્મતિભિઃ અશિવાભિરમગઙ્લાભિઃ પાખણ્ડા દુષ્ટા ઉક્તિર્યાસાં તાભિરસુરસ્ત્રીભિર્વને રુદ્ધા પરિવૃતાતિષ્ઠત્ । અત્રૌપમ્યં કલાવુપનિષદિવ । સાપિ પરમપવિત્રા કુટિલાશયાભિરસુરપ્રિયાભિર્દુષ્ટમતિભિઃ પાખણ્ડાનાં

૭૩। કપય ઇતિ સમ્બુદ્ધિઃ । સ સખા હનૂમાન્ કપિસૈન્યસ્ય દૈન્યહરં તેજો યસ્ય તાદૃશો બાહુભ્યાં ન કેવલમબ્ધેઃ પયસ્તીર્ણઃ । અપિ તુ રાક્ષસસૈન્યમપીત્યન્વયઃ ।

૭૪। કણ્ટકારિકાવૃતાવિત્યધિકણ્ટકારિકાવૃતિ । ઘર્મે નિદાઘે ઉત્ખાતરોપિતાં જાતીલતામિવ નિતાન્તં તાન્તા ગ્લાનિમુપગતા તનુર્યસ્યાસ્તાં સીતામપશ્યમિતિ યોજના ।

૭૫। અબલા અસમર્થા દહનશિખા યથા અનાર્દ્રાણિ શુષ્કાણિ બાલતૃણાનિ દગ્ધુમિચ્છન્ત્યપિ સખાયં વાયું પ્રતીક્ષતે તથૈવ સીતા રાવણાદીન્ ભસ્મસાત્કર્તુમિચ્છન્ત્યપિ ત્વામેવ પ્રતીક્ષમાણા તિષ્ઠતીત્યર્થઃ ।

૭૬। બન્ધુરપિ સગરપુત્રૈર્યજ્ઞિયમશ્વં મૃગયમાણૈઃ ખાતત્વાત્ યો જલધિઃ ડલયોરભેદાજ્જડઽથીઃ । દસ્યવે રાવણાય સંશ્રયં લઙ્કારૂપમદાત્ । અતઃ સ રિપોરિષ્ટઃ શત્રુપક્ષ્યઃ । અતઃ સોઽતિવેલં ભૃશં કિમિતિ પ્રાર્થ્યતે । પ્રાર્થ્યમાનોઽપિ નાયં માર્ગં ત દદ્યાદિતિ ભાવઃ ।

૭૭। નમતે પ્રણામં કુર્વતે બિભીષણાય જીવેત્યાશીર્દાતુમુચિતા । અભયદાનમવ કેવલં યુક્તમ્ । કિન્તુ રાઘવેણાવિચાર્ય શ્રીરપિ દત્તા । સર્વસ્ય સ્વસ્ય સમ્પદો દાનમાશ્રયમ્ । રાવણસ્ય સમ્પદ એવ બિભીષણાય પ્રતિશ્રુતં દાનમિતિ વિરોધપરિહારઃ ।

૭૮। સખા મિત્રં વિભીષણઃ । સમાસાદિ લબ્ધઃ ।

૭૯। અવિલઙ્ઘિતા મર્યાદા વેલા ગુરુજનાદરશ્ચ યેન તાદૃશં બન્ધું સાગરં બબન્ધ । ગુરું ચ સાગરમનુલઙ્ઘનીય લલઙ્ઘ । શમ્ભોર્ભક્તમપિ મુનેઃ પુલસ્ત્યસ્ય સુતં રાવણં ચ કોઽપિ રામ ઇત્યર્થાત્ । દારકૃતે સીતાયા અધિગમાર્થ જઘાન । સર્વત્ર વિરોધાભાસઃ ।

૮૦। ઉઞ્છઃ કણશઃ ક્ષેત્રસ્થસ્ય ધાન્યસ્યાદાનં સ એવ વૃત્તિર્યેષાં તે ઉઞ્છવૃત્તયો મુનયઃ । અસ્ત્રાણ્યેવ ભોગિનઃ સર્પાસ્તેષામગુરુવત્ કૃષ્ણચન્દનવદાશ્રયો રામઃ ।

૮૧। પતઙ્ગઃ સૂર્યઃ । ખેચરા રાક્ષસાસ્તેષાં ભૂભૃતં રાવણમ્ ।

૮૨। વાહિન્યો નદ્યઃ સેનાશ્ચ । નિર્જીવનીકૃતાઃ નિરુદકાઃ કૃતાઃ હતાશ્ચ । વિરોધાભાસ આશ્ચર્યહેતુઃ ।

૮૩। તનૂનપાદગ્નિઃ। તૃણકાનનં ન દદાહ કિન્તુ કીલાલનદીઃ શોણિતનદીઃ સસર્જ પ્રવર્તયામાસ । વિરોધાભાસઃ ।

૮૪। નાકૌકસાં દેવાનામ્ । કુલિશકરો મહેન્દ્રઃ । કાલકૂટાશઃ શિવઃ । * તુ અયાત્ ઇતિ પદચ્છેદઃ । અયઃ શુભાવહો વિધિઃ ।

૮૫। હે વીર રાવણ ।

૮૬। વિષવહ્નેરતિતમાં વિષમં પરકલત્રં સ્પૃષ્ટ્વા સ આમૂલં દગ્ધ ઇત્યન્વયઃ । અપિતમામિતિ લિપિકરપ્રમાદઃ ।

૮૭। “તમાન્તાન્તા” ઇતિ લિપિકરપ્રમાદઃ । તં આતાન્તા આક્લાન્તા ઇતિ પદચ્છેદઃ । સરોજની સરસો જની જન્મ યસ્યાઃ સા । “જની ઇતીદન્તઃ કૃદિકારાદક્તિન।” ઇતીષૂવિધાનાત્ ।

૮૮। સુહૃદો વિયોગયોગાવેવ તાપતોષયોર્હેતુર્નાન્યાવિત્યન્વયઃ ।

૮૯। લબ્ધઃ પરભાગઃ ઉત્કર્ષો યયા સા ।

૯૦। અવતાદિત્યાશિષિ લોટ્ । ધ્રુવસ્ય સખા તદ્વદચલ ઇતિ ભાવઃ ।

૯૧। સુગતિં મોક્ષસ્વરૂપાં ત્વામિચ્છન્ત ઇતિ યોજના । સ્વોત્પાદિતમાત્મજમ્ ।

૯૨। અયોધ્યાં પ્રતિ પ્રસ્થિતો રામ ચન્દ્રઃ સીતાં વક્તિ । સુષમયા પરમયા શોભયા જિતા ઘનસ્થા મેઘમધ્યવર્તિની શમ્પા વિદ્યુદ્યયા તત્સમ્બુદ્ધૌ । વિદ્યુત્પ્રભે સીતે । પેયા વાણી યસ્યાસ્તત્સમ્બુદ્ધૌ । મયિ અસ્યાં પમ્પાયાં ચિરં રુદતિ શિખિભિરસદ્ભિરિત નૃત્યદ્ભિર્ભૃશં મુમુદે । ભાવે લિટ ।

૯૩। શં સુખમ્ । -ઇતા ગતા । સ્વરપગેત્યત્ર સ્વરાપગેતિ ભાવ્યમ્ । સ્વર્ધનીત્યર્થઃ ।

૯૪। અરય એવ કરિણસ્તેષાં હરિપતી સિંહાવિવ રામલક્ષ્મણૌ સતીસહિતૌ । પતિવ્રતયા સીતયા સહિતૌ । અત્ર પ્રાપ્તૌ સ્તઃ ઇતિ શેષઃ ।

૯૫। ઈશસ્ય શિરઃસારસં શિરઃકમલં આસનં યસ્યાસ્તત્સમ્બુદ્ધૌ હે ગઙ્ગે । કથં કથમપિ ।

૯૬। બાલચાતક ભરત । અમૃતં પાતુમનેહસં કાલં મા નયેત્યન્વયઃ

૯૭। મયૂરાઃ પૌરાઃ। મહાભાગતો મહતા ભાગધેયેન । મુદિરં મેઘં રામં ચ ।

૯૮। મહેન્દ્રસ્ય સખા દશરથઃ । યેનાધિષ્ઠિતં ત્વં અખિલાનાં નૃપતિશ્રેષ્ઠાનાં નતેર્નમનસ્ય પાત્રમસિ । યસ્ય તે યશોઽમૃતપાયિભિર્દેવૈઃ પીતં તં દશરથમદ્ય સ્મરસીતિ પ્રશ્નઃ ।

૯૯। અમૃતમન્ધો ભોજનં યેષાં તેષાં દેવાનામ્ । રતેરાનન્દસ્યૈકં સ્થાનમ્ ।

૧૦૦। ઇનઃ સૂર્યઃ । કોઃ પૃથિવ્યાઃ પતિઃ કુત્સિતઃ પતિશ્ચ । વિરોધાભાસઃ ।

૧૦૧। વિધેયં ભૃત્યઃ । રાજા પ્રજાનાં ભૃત્યઃ કાર્યકરોઽસ્તીતિ પ્રસિદ્ધિમાશ્રિત્યયમુક્તિઃ ।

૧૦૨। હે અયોધ્યે ! પરઃશતા નપતયસ્ત્વયા ભુક્તાઃ। તાનધુના કથં ન સ્મરસિ । અમુના પત્યા ત્વં મોહિતા નનુ । “સરઘેવ લોભિતા” ઇતિ પાઠાન્તરમ્ । મધુના સરષા મધુમક્ષિકેવામુના પત્યા રામેણ મોહિતેત્યર્થઃ ।

Proofread by Rajesh Thyagarajan

*Muktamala*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*